# Shri Sudarshana Chakra Stotram

# શ્રીસુદર્શનચક્રસ્તોત્રમ્ અથવા સુદર્શનપૂજાવિધિઃ

## Document Information

Text title : sudarshanachakrastotram

File name : sudarshanachakrastotram.itx

Category : vishhnu, stotra, pUjA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : Garudapurana, karmakANDAkhyaH pUrvakhaNDaH 1, adhyAya 33

Latest update : July 27, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીસુદર્શનચક્રસ્તોત્રમ્ અથવા સુદર્શનપૂજાવિધિઃ

રુદ્ર ઉવાચ ।
સુદર્શનસ્ય પૂજાં મે વદ શઙ્ખગદાધર ।
ગ્રહરોગાદિકં સર્વં યત્કૃત્વા નાશમેતિ વૈ ॥ ૧॥

હરિરુવાચ ।
સુદર્શનસ્ય ચક્રસ્ય શ‍ૃણુ પૂજાં વૃષધ્વજ ।
સ્નાનમાદૌ પ્રકુર્વીત પૂજયેચ્ચ હરિં તતઃ ॥ ૨॥

મૂલમન્ત્રેણ વૈ ન્યાસં મૂલમન્ત્રં શ‍ૃણુષ્વ ચ ।
સહસ્રારં હું ફટ્ નમો મન્ત્રઃ પ્રણવપૂર્વકઃ ॥ ૩॥

કથિતઃ સર્વદુષ્ટાનાં નાશકો મન્ત્રભેદકઃ ।
ધ્યાયેત્સુદર્શનં દેવં હૃદિ પદ્મેઽમલે શુભે ॥ ૪॥

શઙ્ખચક્રગદાપદ્મધરં સૌમ્યં કિરીટિનમ્ ।
આવાહ્ય મણ્ડલે દેવં પૂર્વોક્તવિધિના હર ॥ ૫॥

પૂજયેદ્ગન્ધપુષ્પાદ્યૈરુપચારૈર્મહેશ્વર ।
પૂજયિત્વા જપેન્મન્ત્રં શતમષ્ટોત્તરં નરઃ ॥ ૬॥

એવં યઃ કુરુતે રુદ્ર ચક્રસ્યાર્ચનમુત્તમમ્ ।
સર્વરોગવિનિર્મુક્તો વિષ્ણુલોકં સમાપ્નુયાત્ ॥ ૭॥

એતત્સ્તોત્રં જપેત્પશ્ચાત્સર્વવ્યાધિવિનાશનમ્ ।
અથ સ્તોત્રમ્ ।
નમઃ સુદર્શનાયૈવ સહસ્રાદિત્યવર્ચસે ॥ ૮॥

જ્વાલામાલાપ્રદીપ્તાય સહસ્રારાય ચક્ષુષે ।
સર્વદુષ્ટવિનાશાય સર્વપાતકમર્દિને ॥ ૯॥

સુચક્રાય વિચક્રાય સર્વમન્ત્રવિભેદિને ।

પ્રસવિત્રે જગદ્ધાત્રે જગદ્વિધ્વંસિને નમઃ ॥ ૧૦॥

પાલનાર્થાય લોકાનાં દુષ્ટાસુરવિનાશિને ।
ઉગ્રાય ચૈવ સૌમ્યાય ચણ્ડાય ચ નમો નમઃ ॥ ૧૧॥

નમશ્ચક્ષુઃસ્વરૂપાય સંસારભયભેદિને ।
માયાપઞ્જરભેત્રે ચ શિવાય ચ નમો નમઃ ॥ ૧૨॥

ગ્રહાતિગ્રહરૂપાય ગ્રહાણાં પતેય નમઃ ।
કાલાય મૃત્યવે ચૈવ ભીમાય ચ નમો નમઃ ॥ ૧૩॥

ભક્તાનુગ્રહદાત્રે ચ ભક્તગોપ્ત્રે નમો નમઃ ।
વિષ્ણુરૂપાય શાન્તાય ચાયુધાનાં ધરાય ચ ॥ ૧૪॥

વિષ્ણુશસ્ત્રાય ચક્રાય નમો ભૂયો નમો નમઃ ।
ઇતિ સ્તોત્રં મહાપુણ્યં ચક્રસ્ય તવ કીર્તિતમ્ ॥ ૧૫॥

યઃ પઠેત્પરયા ભક્ત્યા વિષ્ણુલોકં સ ગચ્છતિ ।
ચક્રપૂજાવિધિં યશ્ચ પઠેદ્રુદ્ર જિતોન્દ્રિયઃ ।
સ પાપં ભસ્મસાત્કૃત્વા વિષ્ણુલોકાય કલ્પતે ॥ ૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સુદર્શનપૂજાવિધિર્નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ સમ્પૂર્ણઃ ।

Garudapurana, AchArakANDa, adhyAya 33
Proofread by PSA Easwaran

---

*Shri Sudarshana Chakra Stotram*
pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*